१

ॐ श्रीगणेशाय नमः॥ कस्त्वं शिशो कस्य कुतोसि गंता किं नाम ते त्वं कुत आग-
तोसि एतद्वद त्वं मम सुप्रसिद्धं मत्प्रीतये प्रीतिविवर्द्धनोसि॥१॥ नाहं मनुष्यो
न च देवयक्षौ न ब्राह्मणक्षत्रियवैश्यशूद्राः॥ न ब्रह्मचारी न गृही वनस्थो भि-
क्षुर्न चाहं निजबोधरूपः॥२॥ निमित्तं मनश्चक्षुरादिप्रवृत्तौ निरस्ताखिलोपा-
धिराकाशकल्पः॥ रविर्लोकचेष्टानिमित्तं यथा यः स नित्योपलब्धिस्वरूपोहमात्मा
॥३॥ मनआदीनां मनश्चित्ताहंकारबुद्धीनां चतुर्णां अंतःकरणानां तथा चक्षुरा-
दीनां चक्षुस्त्वक्श्रोत्रजिह्वानासिकानां पंच बुद्धींद्रियाणां वाक्पाणिपादपा-
यूपस्थानां पंच कर्मेंद्रियाणां प्रवृत्तौ स्वस्वव्यापारे निमित्तं हेतुर्यः सोहमात्मेति
संबंधः नित्योपलब्धिस्वरूपं यस्य स तथोक्तः रविरादित्यो यथा येन प्रकारेण प्रका-
शकत्वेन लोकानां चेष्टायां परिस्पंदे निमित्तं तथाधिष्ठानत्वेन यो निमित्तं सोह चा
मात्मेत्यर्थः॥ इयं दृष्टिरात्मज्ञानोपायत्वेन दर्शितः परमार्थतस्तु निरस्तानिशकृता-
खिलानिरविशेषानुपाधियो बुध्यादिलक्षणा यस्य स तथोक्तः निरस्ताखिलो-
पाधिरेव आकाशकल्पः आकाशवद्विभुरद्वयः सोहमात्मेति संबंधः॥ ननु मन

२

द्विमुच्यते नावद्ध इति ॥ तथाचिदाभासकस्यापि वंधमोक्षौ न विद्येते अवस्तुत्वात्
॥ तस्मादहंकारपर्यंतनाशित्वात् वंधमोक्षयोरहं भावः ॥ ततश्च मे नित्यमुक्तमनर्थकमि
त्यत आह ॥ ५ ॥ यथादर्पणाभावे आभासहानौ मुखं विद्यते कल्पनाहीनमेकं ॥
तथा धीवियोगे निराभासको यः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ६ ॥ यथादर्पण
स्याभावे सति आभासस्य मुखप्रतिबिंबस्य हानौ ॥ सत्यां मुखं परमार्थकल्पना
हीनं मिथ्याज्ञानरहितमेकमेव परं विद्यते तथानेनैव प्रकारेण धीवियोगे बुद्धे
र र्नाशे सति निराभासको निःप्रतिबिंबः परमार्थः सन्नेक एव यः सोऽहमात्मा अय
मर्थः आत्माज्ञानकृतोयं बुद्ध्यादिप्रपंचस्तत्र बुद्धौ प्रतिबिंबरूपेणात्मानम
ध्यास्यति ॥ ततश्च तद्गतसुखदुःखादिकं आत्मन्यध्यास्यतीति सोयमध्यासो वं
धश्चात्मज्ञानेनानुभूतेन अज्ञाननिवृत्त्या बुद्ध्यादिप्रपंचनिवृत्त्या बुद्ध्यादिप्रपंचनिवृ
त्ते बुध्यासनिवृत्तिरिति ॥ अध्यासनिवृत्तिश्च मोक्षः न पुनः पारमार्थिको मोक्षवंधौ कस्य

चिदाभासको धीषु जीवोपि तद्वत्सनित्योपलब्धिस्वरूपोहमात्मा ॥५॥ मुखा
भासको मुखप्रतिबिंबो दर्पणे जातौ नानाप्रकारेषु दर्पणे स्थितिपालत ॥ दृ
श्यमानो मुखत्वात् परमार्थमुखस्वरूपात् पृथक्त्वेन भेदेन नैवास्ति वस्तु य
द्यपि मुखाभासको नाम वस्तु नास्त्येव तथाप्युपाधिभेदात् यथा परमार्थतो
मुखान् परस्परं च ते मुखाभासका भिन्नाः प्रतीयंते ॥ तथा चोपाधिगतमल
िनत्वादिधर्माः ॥ प्रतीयंते तद्वन्मुखाभासकवत् चिदाभासकः आत्मप्रतिबिंबः
॥ धीषु बुद्धिषु दृश्यमानो जीव इत्युच्यते यः सोहमात्माजीवास्तेनुपाधिभेदाद्भिन्नाः
त प्रतिभासंते ॥ उपाधिगतसुखदुःखादिभिश्च सुखदुःखादिमंतः प्रतीयंते उपाधिसम्ब वितथ
स्मवस्थितरूपा एवेति सुखदुःखादीनामेकात्मपक्षेपि व्यवस्था युक्तैव नात्मभेदः ॥
शंकते मवस्थापयेतुं श्रुतिश्च एकात्मानमेव प्रतिपादयति एकमेवाद्वितीयमि
त्यादिर्नेदं च प्रतिवेधयति नेह नानास्ति किंचनेत्यादिश्रुतेः साधूक्तमेकमिति
॥ नन्वेवं सति आत्मन एकत्वात् सुखदुःखादिसंबंधाभावात् मोक्षाभावः । बद्धो

वस्वान्॥ तथाभातमात्राभासयत्यक्षमेकः स नित्योपलब्धिस्वरूपोऽहमात्मा॥१०॥
विवस्वानादित्येन प्रभातं प्रकाशितं अक्षं चक्षुः रूपं घटादि प्रगृह्णाति प्रका-
शेन जानाति॥ नाभातं नाप्रकाशितं अंधकारे घटानुपलंभात्॥ एवं सति विव
स्वानप्येकः तथा तेनैव प्रकारेण आभातः प्रकाशितो अधिष्ठितः सन् आभास
यति॥ अधितिष्ठतीत्यर्थः चक्षुः पश्य विवस्वतो अधिष्ठाता सोऽहमात्मेति सच्च-
सर्वेषां भूतानामधिष्ठातृत्वात् चक्षुरधिष्ठानमभिप्रेत्य विवस्वतो बुद्धिः प्रे
रकत्वमभिहितं यस्माद्विवस्वदधिष्ठितं चक्षुर्बुद्धिमुत्पादयति॥ ननु तर्हि प्रका
शांतरेण अधिष्ठातव्य आत्मा॥ न तस्य स्वप्रकाशकत्वात्॥ नान्योऽतोऽस्ति
द्रष्टेति श्रुत्याह द्रष्टान्तरप्रतिषेधादिति किंच॥१०॥ यथा सूर्य एकोऽप्स्वनेकश्च
लासु स्थिरास्वप्यनन्यद्विभाव्यस्वरूपः॥ चलासु प्रभिन्नासु धीष्वेक एवं स नि
त्योपलब्धिस्वरूपोऽहमात्मा॥११॥ यथा येन प्रकारेण आदित्य एकः अप्सु वारि-

आत्मा युगपदनेकबुद्धेषु तिष्ठति ॥ नह्येक एवाश्ववाहको युगपदनेकानश्वानअ-
धितिष्ठतीत्युपलभ्यते ॥ क्रमेणत्वधिष्ठानं युक्तं ॥ तत्रेह नास्ति युगपत्सर्वासां बु-
द्धीनां स्वव्यापारे प्रवृत्तिदर्शनात् अधिष्ठातॄणां च प्रवृत्त्यभावादतो नैक आत्मा
आतत्राह ॥ ८ ॥ यथानेकचक्षुःप्रकाशो रविर्न क्रमेण प्रकाशीकरोति प्रकाश्यं ॥
अनेका धियो यस्तथैकप्रबोधः स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ ९ ॥ यथा ये-
न प्रकारेण रविरादित्यः एक एवानेकेषां चक्षुषां प्रकाशो युगपदेक एवानेके
चक्षुष्वधितिष्ठति तथा तेनैव प्रकारेण एक आत्मा सो प्रबोधश्चेति एकप्रबोधई-
श्वरः अनेका धियो बुद्धीर्युगपदधितिष्ठति न क्रमेण एकैकस्मिन् धियो प्रका-
शीकरोति प्रकाश्यं सोऽहमात्मेति संबंधः ॥ नन्वस्तु तर्हि रविरेवानेकबुद्धीना-
मधिष्ठाता किमात्माभ्युपगमेनेति तथा च श्रुतिः धियो यो नः प्रचोदयात् प्रेरय-
तीत्यत आह ॥ ९ ॥ विवस्वत्प्रभातं यथारूपमक्षं प्रगृह्णाति नाभातमेवं वि-

कृतदुःखादिकमात्मनि मन्यमानो बद्ध इव यो भाति मूढदृष्टेः सोहमात्मा ॥१२॥
समस्तेषु वस्तुष्वनुस्यूतमेकं समस्तानि वस्तूनि यन्न स्पृशंति ॥ वियद्वत्सदा शु
द्धमच्छस्वरूपं स नित्योपलब्धिस्वरूपोहमात्मा ॥१३॥ समस्तेषु वि विशेषेषु
प्रपंचात्मकेषु सदात्मनानुस्यूतं अनुगतमेकं समस्तानि वस्तूनि प्रपंचात्म
कानि यत्सरूपं न स्पृशंति ॥ कुतो वियद्वदाकाशमिव सदा सर्वदा शुद्धं निर्म
लं स्वरूपं अच्छरूपं अमूर्तस्वरूपं यत एकमेव परंब्रह्म यः सोहमात्मेतिः ॥
कथमेकस्य सर्वव्यापित्वं दृष्टांततः श्रुतिः ॥ एको देवः सर्वभूतेषु गू
ढः सर्वव्यापी सर्वभूतांतरात्मा । कर्माध्यक्षः सर्वभूताधिवासः साक्षी
चेताः केवलो निर्गुणश्चेति श्रुत्या सर्वव्यापितं दर्शितं ॥१४॥ उपाधौ य
था भेदता सन्मणीनां तथा भेदता बुद्धिभेदेषु तेपि ॥ यथा चंद्रकाणां ज

पुचलनासुस्थिरासुचअनेकोपिनानापिसन्नानन्तविज्ञानात्मस्वरूपंयस्यसतथोक्तः
नवारिषुरविरनुगतोभवतिकिंतर्हितथैवचनचसहदीप्यमानोऽम्नांत्पाह्नवीरिषुदृ
श्यतइत्यर्थः॥एवमेकआत्माचलनासुप्रभिन्नासुनानाभूतेषुअनेकाःसन्नप्यनन्त
विज्ञात्मस्वरूपः नबुद्धीरनुगच्छतिकिंतर्हिपृथगेवदेदीप्यतेयःसोहमात्मेत्य
र्थः॥११॥घनच्छन्नदृष्टिर्घनच्छन्नमर्कंयथामन्यतेनिःप्रभंचातिमूढः॥तथा।
बद्धवद्भातियोमूढदृष्टेःसनित्योपलब्धिस्वरूपोहमात्मा॥१२॥यथायेनप्रकारे
णमेघेनछन्नातिरोहितादृष्टिर्दर्शनंयस्यसघनच्छन्नदृष्टिःपुरूषघनेनच्छन्नमर्कं
मन्यतेजानातिनिःप्रभंप्रभारहितंअप्रकाशस्वरूपमितियावत्मूर्खोहिम।
न्यतेछन्नदृष्टित्वात्॥प्रकाशस्वरूपमपिरविमप्रकाशमहंपश्यामीतिभ्रान्तिमू
ढोतिमूर्खःसचात्मनोदृष्टिविच्छातमनुगतंसूर्यमेवाप्रकाशंमन्यतेपादपूर्णे
चशब्दःतथातेनैवप्रकारेणअविद्याच्छन्नदृष्टिर्बुद्धिमात्मत्वेनगृहीत्वात।

5

६६७ स्तोत्ररत्नाकर का अंश

स्तोत्ररत्नाकर (शंकराचार्य)

6